सहायक आचार्य प्रतियोगी परीक्षा - 2024
(संस्कृत शिक्षा विभाग) परीक्षा तिथि - 9/9/2024

पुस्तिका में पृष्ठों की संख्या : 16
Number of Pages in Booklet : 16

पुस्तिका में प्रश्नों की संख्या : 150
No. of Questions in Booklet : 150

**Paper Code : 19**

**PAS-24**

इस प्रश्न-पुस्तिका को तब तक न खोलें जब तक कहा न जाए । Do not open this Question Booklet until you are asked to do so.

प्रश्न-पुस्तिका संख्या व बारकोड/
Question Booklet No. & Barcode

400113

**Sub : Samanya Darshan-I**

**Paper-I**

**समय : 03 घण्टे + 10 मिनट अतिरिक्त***
Time : 03 Hours + 10 Minutes Extra*

**अधिकतम अंक : 75**
Maximum Marks : 75

प्रश्न-पुस्तिका के पेपर की सील/पॉलिथीन बैग को खोलने पर प्रश्न-पत्र हल करने से पूर्व परीक्षार्थी यह सुनिश्चित कर लें कि :
- प्रश्न-पुस्तिका संख्या तथा ओ.एम.आर. उत्तर-पत्रक पर अंकित बारकोड संख्या समान है ।
- प्रश्न-पुस्तिका एवं ओ.एम.आर. उत्तर-पत्रक के सभी पृष्ठ व सभी प्रश्न सही मुद्रित हैं । समस्त प्रश्न, जैसा कि ऊपर वर्णित है, उपलब्ध हैं तथा कोई भी पृष्ठ कम नहीं है/ मुद्रण त्रुटि नहीं है ।

किसी भी प्रकार की विसंगति या दोषपूर्ण होने पर परीक्षार्थी वीक्षक से दूसरा प्रश्न-पत्र प्राप्त कर लें । यह सुनिश्चित करने की जिम्मेदारी अभ्यर्थी की होगी । परीक्षा प्रारम्भ होने के 5 मिनट पश्चात् ऐसे किसी दावे/आपत्ति पर कोई विचार नहीं किया जायेगा ।

**On opening the paper seal/polythene bag of the Question Booklet before attempting the question paper, the candidate should ensure that :**
- **Question Booklet Number and Barcode Number of OMR Answer Sheet are same.**
- **All pages & Questions of Question Booklet and OMR Answer Sheet are properly printed. All questions as mentioned above are available and no page is missing/misprinted.**

**If there is any discrepancy/defect, candidate must obtain another Question Booklet from Invigilator. Candidate himself shall be responsible for ensuring this. No claim/objection in this regard will be entertained after five minutes of start of examination.**

## परीक्षार्थियों के लिए निर्देश

1. प्रत्येक प्रश्न के लिये एक विकल्प भरना अनिवार्य है ।
2. सभी प्रश्नों के अंक समान हैं ।
3. प्रत्येक प्रश्न का मात्र एक ही उत्तर दीजिए । एक से अधिक उत्तर देने की दशा में प्रश्न के उत्तर को गलत माना जाएगा ।
4. OMR उत्तर-पत्रक इस प्रश्न-पुस्तिका के अन्दर रखा है । जब आपको प्रश्न-पुस्तिका खोलने को कहा जाए, तो उत्तर-पत्रक निकाल कर ध्यान से केवल नीले बॉल पॉइंट पेन से विवरण भरें ।
5. कृपया अपना रोल नम्बर ओ.एम.आर. उत्तर-पत्रक पर सावधानीपूर्वक सही भरें । गलत रोल नम्बर भरने पर परीक्षार्थी स्वयं उत्तरदायी होगा ।
6. प्रत्येक गलत उत्तर के लिए प्रश्न अंक का 1/3 भाग काटा जायेगा । गलत उत्तर से तात्पर्य अशुद्ध उत्तर अथवा किसी भी प्रश्न के एक से अधिक उत्तर से है ।
7. प्रत्येक प्रश्न के पाँच विकल्प दिये गये हैं, जिन्हें क्रमश: 1, 2, 3, 4, 5 अंकित किया गया है । अभ्यर्थी को सही उत्तर निर्दिष्ट करते हुए उनमें से केवल एक गोले (बबल) को उत्तर-पत्रक पर नीले बॉल पॉइंट पेन से गहरा करना है ।
8. यदि आप प्रश्न का उत्तर नहीं देना चाहते हैं तो उत्तर-पत्रक में पाँचवें (5) विकल्प को गहरा करें । यदि पाँच में से कोई भी गोला गहरा नहीं किया जाता है, तो ऐसे प्रश्न के लिये प्रश्न अंक का 1/3 भाग काटा जायेगा ।

9.* प्रश्न-पत्र हल करने के उपरांत अभ्यर्थी अनिवार्य रूप से ओ.एम.आर. उत्तर-पत्रक जाँच लें कि समस्त प्रश्नों के लिये एक विकल्प (गोला) भर दिया गया है । इसके लिये ही निर्धारित समय से 10 मिनट का अतिरिक्त समय दिया गया है ।

10. यदि अभ्यर्थी 10% से अधिक प्रश्नों में पाँच विकल्पों में से कोई भी विकल्प अंकित नहीं करता है, तो उसको अयोग्य माना जायेगा ।
11. मोबाइल फोन अथवा अन्य किसी इलेक्ट्रोनिक यंत्र का परीक्षा हॉल में प्रयोग पूर्णतया वर्जित है । यदि किसी अभ्यर्थी के पास ऐसी कोई वर्जित सामग्री मिलती है तो उसके विरुद्ध आयोग द्वारा नियमानुसार कार्यवाही की जायेगी ।

चेतावनी : अगर कोई अभ्यर्थी नकल करते पकड़ा जाता है या उसके पास से कोई अनधिकृत सामग्री पाई जाती है, तो उस अभ्यर्थी के विरुद्ध पुलिस में प्राथमिकी दर्ज कराते हुए राजस्थान सार्वजनिक परीक्षा (भर्ती में अनुचित साधनों की रोकथाम अध्युपाय) अधिनियम, 2022 तथा अन्य प्रभावी कानून एवं आयोग के नियमों-प्रावधानों के तहत कार्यवाही की जाएगी । साथ ही आयोग ऐसे अभ्यर्थी को भविष्य में होने वाली आयोग की समस्त परीक्षाओं से विवर्जित कर सकता है ।

## INSTRUCTIONS FOR CANDIDATES

1. **It is mandatory to fill one option for each question.**
2. **All** questions carry equal marks.
3. Only **one** answer is to be given for each question. If more than one answers are marked, it would be treated as wrong answer.
4. The OMR Answer Sheet is inside this Question Booklet. When you are directed to open the Question Booklet, take out the Answer Sheet and fill in the particulars carefully with **Blue Ball Point Pen** only.
5. Please correctly fill your Roll Number in OMR Answer Sheet. Candidate will themself be responsible for filling wrong Roll No.
6. **1/3 part of the mark(s) of each question will be deducted for each wrong answer.** A wrong answer means an incorrect answer or more than one answers for any question.
7. **Each question has five options marked as 1, 2, 3, 4, 5. You have to darken only one circle (bubble) indicating the correct answer on the Answer Sheet using BLUE BALL POINT PEN.**
8. **If you are not attempting a question then you have to darken the circle '5'. If none of the five circles is darkened, one third (1/3) part of the marks of question shall be deducted.**

9.* **After solving question paper, candidate must ascertain that he/she has darkened one of the circles (bubbles) for each of the questions. Extra time of 10 minutes beyond scheduled time, is provided for this.**

10. **A candidate who has not darkened any of the five circles in more than 10% questions, shall be disqualified.**
11. Mobile Phone or any other electronic gadget in the examination hall is strictly prohibited. A candidate found with any of such objectionable material with him/her will be strictly dealt as per rules.

**Warning** : If a candidate is found copying or if any unauthorized material is found in his/her possession, F.I.R. would be lodged against him/her in the Police Station and he/she would liable to be prosecuted under **Rajasthan Public Examination (Measures for Prevention of Unfair Means in Recruitment) Act, 2022 & any other laws applicable and Commission's Rules-Regulations.** Commission may also debar him/her permanently from all future examinations.

उत्तर-पत्रक में दो प्रतियाँ हैं – मूल प्रति और कार्बन प्रति । परीक्षा समाप्ति पर परीक्षा कक्ष छोड़ने से पूर्व परीक्षार्थी उत्तर-पत्रक की दोनों प्रतियाँ वीक्षक को सौंपेंगे, परीक्षार्थी स्वयं कार्बन प्रति अलग नहीं करें । वीक्षक उत्तर-पत्रक की मूल प्रति को अपने पास जमा कर, कार्बन प्रति को मूल प्रति से कट लाइन से मोड़ कर सावधानीपूर्वक अलग कर परीक्षार्थी को सौंपेंगे, जिसे परीक्षार्थी अपने साथ ले जायेंगे । परीक्षार्थी को उत्तर-पत्रक की कार्बन प्रति चयन प्रक्रिया पूर्ण होने तक सुरक्षित रखनी होगी एवं आयोग द्वारा माँगे जाने पर प्रस्तुत करनी होगी ।

1. न्यायवैशेषिकतन्त्रे दुःखं कतिविधम् ?
(1) त्रिविधम् (2) सप्तविधम्
(3) षोडशविधम् (4) एकविंशतिविधम्
(5) अनुत्तरितः प्रश्नः

2. न्यायवैशेषिकनये जगतः उपादानकारणं किम् ?
(1) परमाणुः (2) प्रकृतिः
(3) ईश्वरः (4) महत्तत्त्वम्
(5) अनुत्तरितः प्रश्नः

3. वैशेषिकसूत्रे कतिपदार्थाः परिगणिताः सन्ति ?
(1) सप्तपदार्थाः (2) षड्पदार्थाः
(3) दशपदार्थाः (4) पञ्चपदार्थाः
(5) अनुत्तरितः प्रश्नः

4. न्यायवैशेषिकनये अभावस्य कारणं भवति –
(1) समवायिकारणम्
(2) निमित्तकारणम्
(3) उपादानकारणम्
(4) असमवायिकारणम्
(5) अनुत्तरितः प्रश्नः

5. घटरूपं प्रति कपालरूपं केन सम्बन्धेन असमवायिकारणं भवति ?
(1) स्वसमवायिसमवेतत्वसम्बन्धेन
(2) समवायसम्बन्धेन
(3) संयुक्तसमवायसम्बन्धेन
(4) संयुक्तसमवायिसमवेतत्वसम्बन्धेन
(5) अनुत्तरितः प्रश्नः

6. आकाशकालदिगात्मनां किं साधर्म्यम् ?
(1) अणुत्वम् (2) विभुत्वम्
(3) क्रियावत्त्वम् (4) मूर्तत्वम्
(5) अनुत्तरितः प्रश्नः

7. विशेषं पदार्थमधिकृत्य कृतं शास्त्रं वर्तते ।
(1) न्यायः (2) वैशेषिकम्
(3) वैभाषिकम् (4) साङ्ख्यशास्त्रम्
(5) अनुत्तरितः प्रश्नः

8. वैशेषिकदर्शनानुसारं कालक्रमेण समीचीनं विकल्पं चिनुत ।
(1) वैशेषिकसूत्रम् – प्रशस्तपादभाष्यम् – किरणावली – तर्कसंग्रहः
(2) वैशेषिकसूत्रम् – किरणावली – तर्कसंग्रहः – प्रशस्तपादभाष्यम्
(3) किरणावली – प्रशस्तपादभाष्यम्– वैशेषिकसूत्रम् – तर्कसंग्रहः
(4) तर्कसंग्रहः – किरणावली – वैशेषिकसूत्रम् – प्रशस्तपादभाष्यम्
(5) अनुत्तरितः प्रश्नः

9. परमाणवः सन्ति –
(1) अतीन्द्रियाः, निरवयवाः, अविभाज्याः, नित्याश्च
(2) अतीन्द्रियाः, सावयवाः, अविभाज्याः नित्याश्च
(3) अतीन्द्रियाः, सावयवाः, विभाज्याः अनित्याश्च
(4) अतीन्द्रियाः, निरवयवाः, अविभाज्याः अनित्याश्च
(5) अनुत्तरितः प्रश्नः

10. प्रशस्तपादभाष्यस्य अपरं नाम अस्ति –
(1) सप्तपदार्थी (2) किरणावली
(3) पदार्थधर्मसंग्रहः (4) व्योमवती
(5) अनुत्तरितः प्रश्नः

**11.** न्यायवैशेषिकदर्शने आकाशः अस्ति –

(1) विभुः, अनेकः, नित्यश्च

(2) परिच्छिन्नः, अनेकः, नित्यश्च

(3) विभुः, एकः, अनित्यश्च

(4) विभुः, एकः, नित्यश्च

(5) अनुत्तरितः प्रश्नः

**12.** सांख्यदर्शने आध्यात्मिकादयः त्रयो भेदाः कस्य ?

(1) जीवस्य (2) दुःखस्य

(3) सुखस्य (4) मोक्षस्य

(5) अनुत्तरितः प्रश्नः

**13.** "प्रकृतिपुरुषान्यताख्यातिरूपोऽवबोधः सम्यग् ज्ञायते येन तत् किम् ?"

(1) अर्थशास्त्रम् (2) साङ्ख्यशास्त्रम्

(3) कामशास्त्रम् (4) अश्वशास्त्रम्

(5) अनुत्तरितः प्रश्नः

**14.** सांख्यनये पुरुषो भवति –

(1) कर्ता (2) अकर्ता

(3) संहर्ता (4) अद्रष्टा

(5) अनुत्तरितः प्रश्नः

**15.** अप्रसवधर्मी कः ?

(1) प्रकृतिः (2) बुद्धिः

(3) अहङ्कारः (4) पुरुषः

(5) अनुत्तरितः प्रश्नः

**16.** शब्दत्वसाक्षात्कारे कः सन्निकर्षः ?

(1) समवेतसमवायः

(2) समवायः

(3) संयोगः

(4) संयुक्तसमवेतसमवायः

(5) अनुत्तरितः प्रश्नः

**17.** चक्षुषाज्ञनानुपलब्धौ किं कारणम् ?

(1) अतिदूरम् (2) सौक्ष्म्यम्

(3) अतिसामीप्यम् (4) इन्द्रियाभिघातः

(5) अनुत्तरितः प्रश्नः

**18.** सांख्यनये तमो भवति –

(1) चलम् (2) प्रकाशकम्

(3) वरणकम् (4) उपष्टम्भकम्

(5) अनुत्तरितः प्रश्नः

**19.** पुरुषबन्धनहेतुर्भवति –

(1) प्रकृतिपुरुषयोर्भेदग्रहः

(2) प्रकृतिपुरुषयोर्भेदाग्रहः

(3) दुःखत्रयनाशः

(4) विवेकज्ञानम्

(5) अनुत्तरितः प्रश्नः

**20.** सांख्यशब्दस्यार्थो भवति –

(1) सप्तपदार्थानां तत्त्वज्ञानम्

(2) अविद्यानाशः

(3) प्रवृत्तेरपायः

(4) प्रकृति–पुरुषयोः विवेकज्ञानम्

(5) अनुत्तरितः प्रश्नः

**21.** सांख्यदर्शने गुणानां साम्यावस्था उच्यते –

(1) प्रकृतिः (2) विकृतिः

(3) प्रकृतिविकृतिः (4) पुरुषः

(5) अनुत्तरितः प्रश्नः

**22.** शब्दप्रमाणस्य स्वतःप्रामाण्यं कः स्वीकरोति ?

(1) नैयायिकः (2) सांख्यः

(3) सौगतः (4) वैशेषिकः

(5) अनुत्तरितः प्रश्नः

23. समुचितं क्रमं चिनुत ।

(1) कपिलः – पञ्चशिखः – आसुरिः – ईश्वरकृष्णः

(2) कपिलः – ईश्वरकृष्णः – पञ्चशिखः – आसुरिः

(3) कपिलः – आसुरिः – पञ्चशिखः – ईश्वरकृष्णः

(4) आसुरिः – पञ्चशिखः – ईश्वरकृष्णः – कपिलः

(5) अनुत्तरितः प्रश्नः

24. त्रैगुण्यविपर्ययात् इत्यनेन हेतुना कस्यसिद्धिः भवति ?

(1) प्रकृतेः कारणत्वस्य

(2) पुरुषस्यास्तित्वस्य

(3) पुरुषबहुत्वस्य

(4) प्रकृतिपुरुषयोः सम्बन्धस्य

(5) अनुत्तरितः प्रश्नः

25. ब्रह्मसूत्रशाङ्करभाष्ये शङ्कराचार्येण "प्रधानमल्ल" इति शब्देन कस्य दर्शनस्य सङ्केतः कृतः ?

(1) न्यायदर्शनस्य (2) वैशेषिकदर्शनस्य

(3) सांख्यदर्शनस्य (4) मीमांसादर्शनस्य

(5) अनुत्तरितः प्रश्नः

26. "सूर्यादिकं गतिमत् देशान्तरप्राप्तित्वात् देवदत्तवत्" इत्यत्र अनुमानम् अस्ति –

(1) केवलव्यतिरेक्यनुमानम्

(2) पूर्ववदनुमानम्

(3) शेषवदनुमानम्

(4) सामान्यतोदृष्टानुमानम्

(5) अनुत्तरितः प्रश्नः

27. असम्प्रज्ञातः समाधिः अस्ति –

(1) द्विविधः (2) त्रिविधः

(3) चतुर्विधः (4) पञ्चविधः

(5) अनुत्तरितः प्रश्नः

28. "तस्य वाचकः प्रणवः" इत्यत्र तत्पदेन कस्य बोधः ?

(1) जीवात्मनः (2) चित्तस्य

(3) अहङ्कारस्य (4) ईश्वरस्य

(5) अनुत्तरितः प्रश्नः

29. व्यासमते प्रणवजपो भवति –

(1) सन्तोषः (2) अपरिग्रहः

(3) स्वाध्यायः (4) तपः

(5) अनुत्तरितः प्रश्नः

30. नियमेषु परिगण्यते –

(1) अस्तेयम् (2) सत्यम्

(3) तपः (4) अपरिग्रहः

(5) अनुत्तरितः प्रश्नः

31. रजसा विषयेष्वेव वृत्तिमत् किं भवति ?

(1) क्षिप्तम् (2) विक्षिप्तम्

(3) मूढम् (4) निरुद्धम्

(5) अनुत्तरितः प्रश्नः

32. सांख्यदर्शने सत्कार्यवादं साधयितुं कति युक्तयः सन्ति ?

(1) तिस्रः (2) पञ्च

(3) सप्त (4) नव

(5) अनुत्तरितः प्रश्नः

**33.** तत्त्ववैशारदी इति टीकाग्रन्थ: केन विरचितः ?

(1) विज्ञानभिक्षुणा (2) वाचस्पतिमिश्रेण

(3) भोजराजेन (4) शङ्करानन्देन

(5) अनुत्तरितः प्रश्नः

**34.** अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाः सन्ति –

(1) यमाः (2) नियमाः

(3) हठयोगः (4) क्रियायोगः

(5) अनुत्तरितः प्रश्नः

**35.** योगदर्शनानुसारं पुरुषस्य प्रतिबिम्बं कः गृह्णाति ?

(1) अहङ्कारः (2) चित्तम्

(3) ईश्वरः (4) प्रकृतिः

(5) अनुत्तरितः प्रश्नः

**36.** योगसारसंग्रहः केन प्रणीतः ?

(1) वाचस्पतिमिश्रेण

(2) गौडपादाचार्येण

(3) श्रीकृष्णवल्लभाचार्येण

(4) आचार्यविज्ञानभिक्षुणा

(5) अनुत्तरितः प्रश्नः

**37.** आसनानां सिद्धिः कदा भवति ?

(1) कर्मानुष्ठानेन (2) अङ्गमेजयत्वेन

(3) ध्यानेन (4) प्रयत्नशैथिल्येन

(5) अनुत्तरितः प्रश्नः

**38.** वाचस्पतिमते सम्प्रज्ञातः कतिविधः ?

(1) द्विविधः (2) त्रिविधः

(3) चतुर्विधः (4) पञ्चविधः

(5) अनुत्तरितः प्रश्नः

**39.** कालक्रमानुरोधेन समीचीनं विकल्पं चिनुत ।

(1) पतञ्जलिः – वाचस्पतिमिश्रः – भोजदेवः – विज्ञानभिक्षुः

(2) पतञ्जलिः – विज्ञानभिक्षुः – वाचस्पतिमिश्रः – भोजदेवः

(3) पतञ्जलिः – भोजदेवः – विज्ञानभिक्षुः – वाचस्पतिमिश्रः

(4) पतञ्जलिः – भोजदेवः – वाचस्पतिमिश्रः – विज्ञानभिक्षुः

(5) अनुत्तरितः प्रश्नः

**40.** वाचस्पतिमिश्रप्रणीता तत्त्ववैशारदी कस्य भाष्यस्य टीका विद्यते ?

(1) शाङ्करभाष्यस्य (2) व्यासभाष्यस्य

(3) न्यायभाष्यस्य (4) शाबरभाष्यस्य

(5) अनुत्तरितः प्रश्नः

**41.** तपःस्वाध्यायेश्वरप्रणिधानानि उच्यन्ते –

(1) जपयोगः (2) क्रियायोगः

(3) हठयोगः (4) अष्टाङ्गयोगः

(5) अनुत्तरितः प्रश्नः

**42.** न्यायरत्नमालायाः कर्ता कः ?

(1) पार्थसारथिमिश्रः (2) कुमारिलभट्टः

(3) प्रभाकरमिश्रः (4) शालिकनाथः

(5) अनुत्तरितः प्रश्नः

**43.** क्रियायोगे स्वाध्यायः इति शब्दस्य कोऽर्थः ?

(1) प्रणवादिपवित्राणां जपः

(2) सर्वक्रियाणां परमगुरावर्पणम्

(3) सुखदुःखादिद्वन्द्वसहनम्

(4) भूतानामनभिद्रोहः

(5) अनुत्तरितः प्रश्नः

**44.** मीमांसकमते हेत्वाभासाः कति ?

(1) चत्वारः (2) षड्

(3) त्रयः (4) पञ्च

(5) अनुत्तरितः प्रश्नः

**45.** भाट्टमते शब्दः कः ?

(1) द्रव्यम् (2) पदार्थः

(3) गुणः (4) सामान्यम्

(5) अनुत्तरितः प्रश्नः

**46.** प्राभाकराणां ख्यातिः प्रसिद्धा अस्ति –

(1) सत्ख्यातिः

(2) असत्ख्यातिः

(3) अनिर्वचनीयख्यातिः

(4) अख्यातिः

(5) अनुत्तरितः प्रश्नः

**47.** समुचितं मेलयत –

| | अ | | ब |
|---|---|---|---|
| a. | कुमारिलभट्टः | i. | निबन्धनम् |
| b. | प्रभाकरमिश्रः | ii. | टुप्टीका |
| c. | पार्थसारथिमिश्रः | iii. | तर्ककौमुदी |
| d. | लौगाक्षिभास्करः | iv. | न्यायरत्नमाला |

समुचितं विकल्पं चिनुत –

| | a | b | c | d |
|---|---|---|---|---|
| (1) | i | ii | iv | iii |
| (2) | iv | i | ii | iii |
| (3) | ii | i | iv | iii |
| (4) | ii | i | iii | iv |

(5) अनुत्तरितः प्रश्नः

**48.** प्रामाण्यं स्वतो गृह्यते इति स्वीकरोति

(1) मीमांसकः (2) नैयायिकः

(3) वात्स्यायनः (4) धर्मकीर्तिः

(5) अनुत्तरितः प्रश्नः

**49.** मीमांसादर्शने शब्दस्य वाच्यार्थो भवति –

(1) व्यक्तिः

(2) जातिः

(3) उभौ

(4) जातिविशिष्टव्यक्तिः

(5) अनुत्तरितः प्रश्नः

**50.** शास्त्रदीपिकाग्रन्थस्य कर्त्ता अस्ति –

(1) वाचस्पतिमिश्रः

(2) पार्थसारथिमिश्रः

(3) नागेशः

(4) प्रभाकरः

(5) अनुत्तरितः प्रश्नः

**51.** 'अथातो धर्मजिज्ञासा' इत्यत्र अथशब्दः अस्ति –

(1) ज्ञानार्थकः (2) विचारार्थकः

(3) आनन्तर्यार्थकः (4) सदृशार्थकः

(5) अनुत्तरितः प्रश्नः

**52.** शबराचार्येण प्रणीतम् अस्ति –

(1) वार्तिकम् (2) सूत्रम्

(3) आख्यानम् (4) भाष्यम्

(5) अनुत्तरितः प्रश्नः

**53.** संसारस्य अनादित्वं स्वीकरोति –

(1) लोकायतः (2) मीमांसकः

(3) बौद्धः (4) जैनः

(5) अनुत्तरितः प्रश्नः

54. अर्थसंग्रहानुसारं "प्रयाजाद्यङ्गजातम्" इति आर्थीभावनायां कथम् अन्वेति ?

(1) इतिकर्त्तव्यतात्वेन (2) करणत्वेन

(3) साध्यत्वेन (4) साधनत्वेन

(5) अनुत्तरितः प्रश्नः

55. "वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्मः" इत्यत्र 'वेदप्रतिपाद्यः' इति शब्दस्य प्रयोगो भवति –

(1) भोजनादावतिव्याप्तिवारणाय

(2) श्येनादावतिव्याप्तिवारणाय

(3) प्रयोजनेऽतिव्याप्तिवारणाय

(4) शयनादावतिव्याप्तिवारणाय

(5) अनुत्तरितः प्रश्नः

56. सुमेलनं कुरुत –

| | | | |
|---|---|---|---|
| क. | जैमिनीयन्यायविस्तरः | 1. | अप्पय्यदीक्षितः |
| ख. | तन्त्रवार्तिकम् | 2. | मण्डनमिश्रः |
| ग. | विभ्रमविवेकः | 3. | माधवाचार्यः |
| घ. | विधिरसायनम् | 4. | कुमारिलभट्ट |

| | क | ख | ग | घ |
|---|---|---|---|---|
| (1) | 3 | 2 | 4 | 1 |
| (2) | 2 | 3 | 1 | 4 |
| (3) | 3 | 4 | 2 | 1 |
| (4) | 3 | 4 | 1 | 2 |

(5) अनुत्तरितः प्रश्नः

57. गवयदर्शनं गोस्मरणस्य बुद्धिमुत्पादयति अत्र प्रमाणमस्ति ।

(1) प्रत्यक्षम् (2) अनुमानम्

(3) अभावः (4) उपमानम्

(5) अनुत्तरितः प्रश्नः

58. सृष्टिस्थितिप्रलयप्रवेशनियमनानि पञ्च के ?

(1) विनियोगाः (2) अर्थवादाः

(3) विधयः (4) मन्त्राः

(5) अनुत्तरितः प्रश्नः

59. 'ज्ञाननिवर्त्यत्वं मिथ्यात्वम्' इति लक्षणकर्ता – अस्ति

(1) विवरणाचार्यः (2) उदयनाचार्यः

(3) चित्सुखाचार्यः (4) रामानन्दाचार्यः

(5) अनुत्तरितः प्रश्नः

60. श्रीकरभाष्यं कस्य कृतिः ?

(1) श्रीपतेः (2) श्रीकरस्य

(3) श्रीकण्ठस्य (4) सर्वज्ञात्ममुनेः

(5) अनुत्तरितः प्रश्नः

61. ब्रह्मसूत्रस्य तृतीयाध्यायस्य नाम किम् ?

(1) समन्वयाध्यायः (2) फलाध्यायः

(3) साधनाध्यायः (4) अविरोधाध्यायः

(5) अनुत्तरितः प्रश्नः

62. श्रीमद्भगवद्गीतानुसारं क्रोधः कस्माद् गुणात् समुद्भवति ?

(1) सत्त्वगुणात् (2) तमोगुणात्

(3) रजोगुणात् (4) स्वात्मगुणात्

(5) अनुत्तरितः प्रश्नः

63. आदिशङ्कराचार्यस्य साक्षाच्छिष्येषु नान्यतमः –

(1) पद्मपादाचार्यः (2) त्रोटकाचार्यः

(3) हस्तामलकाचार्यः (4) क्षपणकाचार्यः

(5) अनुत्तरितः प्रश्नः

**64.** 'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः' इत्युक्तिः कस्याम् उपनिषदि वर्तते ?

(1) मुण्डकोपनिषदि

(2) कठोपनिषदि

(3) केनोपनिषदि

(4) बृहदारण्यकोपनिषदि

(5) अनुत्तरितः प्रश्नः

**65.** छान्दोग्यप्रकरणे एकविज्ञानेन किं फलं निरूप्यते ?

(1) एकविज्ञानम् (2) विज्ञानद्वयम्

(3) विज्ञानत्रयम् (4) सर्वविज्ञानम्

(5) अनुत्तरितः प्रश्नः

**66.** धर्मब्रह्ममीमांसयोः शास्त्रैकत्वं स्वीकरोति

(1) वाचस्पतिमिश्रः

(2) शङ्कराचार्यः

(3) विवरणाचार्यः

(4) बोधायनः

(5) अनुत्तरितः प्रश्नः

**67.** विशिष्टाद्वैतं मतमस्ति –

(1) शङ्कराचार्यस्य (2) रामानुजाचार्यस्य

(3) मध्वाचार्यस्य (4) विवरणाचार्यस्य

(5) अनुत्तरितः प्रश्नः

**68.** अधोलिखितानि तात्पर्यग्राहकलिङ्गानि यथाक्रमं योजयत –

a. अभ्यासः

b. अपूर्वता

c. उपक्रमोपसंहारौ

d. फलम्

(1) a, b, c, d (2) b, c, d, a

(3) c, a, b, d (4) a, c, d, b

(5) अनुत्तरितः प्रश्नः

**69.** 'स्मृतिरूपः परत्र पूर्वदृष्टावभासः' इति लक्षणम् अस्ति –

(1) विज्ञानस्य (2) अध्यासस्य

(3) ईश्वरस्य (4) ब्रह्मणः

(5) अनुत्तरितः प्रश्नः

**70.** 'तत्त्वमसि' इति महावाक्यं प्रथमं श्रूयते –

(1) कठोपनिषदि (2) प्रश्नोपनिषदि

(3) छान्दोग्योपनिषदि (4) केनोपनिषदि

(5) अनुत्तरितः प्रश्नः

**71.** 'जन्माद्यस्य यतः' इति सूत्रं कथयति –

(1) जगल्लक्षणम् (2) इन्द्रियलक्षणम्

(3) काव्यलक्षणम् (4) ब्रह्मलक्षणम्

(5) अनुत्तरितः प्रश्नः

**72.** 'चतुर्भ्यः भूतेभ्यश्चैतन्यमुपजायते' कस्य मतम् ?

(1) जैनस्य

(2) चार्वाकस्य

(3) बौद्धस्य

(4) निम्बार्क–वेदान्तस्य

(5) अनुत्तरितः प्रश्नः

**73.** महतः परमव्यक्तमव्यक्तात् पुरुषः परः ।
पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः ।।
इति श्रूयते –

(1) ईशावास्योपनिषदि

(2) कठोपनिषदि

(3) केनोपनिषदि

(4) प्रश्नोपनिषदि

(5) अनुत्तरितः प्रश्नः

74. कण्टकादिजन्यं दुःखमेव –

(1) मोक्षः (2) नरकः

(3) प्रयोजनम् (4) स्वर्गः

(5) अनुत्तरितः प्रश्नः

75. अधोलिखितेषु वादेषु चार्वाकैः किम् अङ्गीक्रियते ?

a. स्वभाववादः

b. परिणामवादः

c. शरीरात्मवादः

d. सत्कार्यवादः

समुचितं युग्मं चिनुत –

(1) a & b (2) b & c

(3) a & c (4) c & d

(5) अनुत्तरितः प्रश्नः

76. 'अङ्गनाद्यालिङ्गनादिजन्यं सुखमेव पुरुषार्थः' इति कस्य मतम् ?

(1) आर्हतदर्शनस्य

(2) लोकायतस्य

(3) सौगतदर्शनस्य

(4) सौत्रान्तिकदर्शनस्य

(5) अनुत्तरितः प्रश्नः

77. अधोलिखितेषु युगलेषु समीचीनं युगलं चिनुत ।

(1) बौद्धाः – चैतन्यम् आत्मा

(2) वेदान्तिनः – देहः आत्मा

(3) काणादाः – इन्द्रियाण्येव आत्मा

(4) चार्वाकाः – चैतन्यविशिष्टः देह एव आत्मा

(5) अनुत्तरितः प्रश्नः

78. चार्वाकमते ईश्वरः कः ?

(1) सहस्रमुखादियुक्तः

(2) अलौकिकशक्तिमान्

(3) लोकसिद्धः राजा

(4) सर्वज्ञत्वादिविशिष्टः चेतनः

(5) अनुत्तरितः प्रश्नः

79. चार्वाकाः जगतः उपादानतत्त्वानि स्वीकुर्वन्ति –

(1) पृथिव्यप्तेजोवाय्वाकाशाः

(2) पृथिव्यप्तेजोवायवः

(3) पृथिवीजलतेजोकालाः

(4) पृथिवीजलवायुमनांसि

(5) अनुत्तरितः प्रश्नः

80. पण्डितानुसारं चार्वाकदर्शने वेदस्य कर्त्ता अस्ति –

(1) राजा (2) ईश्वरः

(3) व्यासः (4) निशाचरः

(5) अनुत्तरितः प्रश्नः

81. शरीरात्मवादे मोक्षः अस्ति –

(1) आत्मनः स्वस्वरूपे अवस्थानम्

(2) परमात्मनि लयः

(3) देहच्छेदः

(4) मूर्च्छा

(5) अनुत्तरितः प्रश्नः

82. चार्वाकमते कति प्रमाणानि सन्ति ?

(1) चत्वारि (2) त्रीणि

(3) द्वे (4) एकम्

(5) अनुत्तरितः प्रश्नः

83. जयराशिभट्टः आचार्यः अस्ति –

(1) न्यायदर्शनस्य (2) मीमांसादर्शनस्य
(3) चार्वाकदर्शनस्य (4) सांख्यदर्शनस्य
(5) अनुत्तरितः प्रश्नः

84. इन्द्रियाणामपि आत्मत्वं स्वीकरोति –

(1) चार्वाकः (2) शंकराचार्यः
(3) धर्मकीर्तिः (4) रामानन्दाचार्यः
(5) अनुत्तरितः प्रश्नः

85. लोकायतशब्दे आयतशब्दः अस्ति –

(1) प्रकारवाचकः (2) विस्तारवाचकः
(3) लोचनवाचकः (4) क्षेत्रवाचकः
(5) अनुत्तरितः प्रश्नः

86. नास्तिकशिरोमणिशब्देन कस्य बोधः ?

(1) दिगम्बरजैनस्य
(2) सौत्रान्तिकबौद्धस्य
(3) वैभाषिकबौद्धस्य
(4) लोकायतचार्वाकस्य
(5) अनुत्तरितः प्रश्नः

87. जैनमतेन पुण्यं कुत्रान्तर्भवति ?

(1) आस्रवे (2) निर्जरायाम्
(3) संवरे (4) द्रव्ये
(5) अनुत्तरितः प्रश्नः

88. नीतिकामशास्त्रकारमते पुरुषार्थसंख्या अस्ति –

(1) पञ्च (2) द्वौ
(3) त्रयः (4) चत्वारः
(5) अनुत्तरितः प्रश्नः

89. जैनदर्शने कस्य निरोधः संवर इत्युच्यते ?

(1) आत्मनः (2) मनसः
(3) आस्रवस्य (4) संस्कारस्य
(5) अनुत्तरितः प्रश्नः

90. जैनदर्शनदिशा बन्धहेतवः के ?

(1) मिथ्यादर्शनाविरतिप्रमाद–कषाययोगाः ।
(2) मिथ्यादर्शनाविरति–प्रवृत्त्यादयः ।
(3) मिथ्यादर्शनाविरति–भ्रान्त्यादयः ।
(4) मिथ्यादर्शनाविरतिकर्मादयः
(5) अनुत्तरितः प्रश्नः

91. जैनमते तत्त्वार्थश्रद्धानं किम् ?

(1) सम्यग्ज्ञानम् (2) सम्यक्चारित्रम्
(3) सम्यगनुभवः (4) सम्यग्दर्शनम्
(5) अनुत्तरितः प्रश्नः

92. षड्दर्शनसमुच्चयः केन विरचितः ?

(1) विद्यानन्देन
(2) हरिभद्रेण
(3) समन्तभद्रेण
(4) सिद्धसेनदिवाकरेण
(5) अनुत्तरितः प्रश्नः

93. सप्तभङ्गीनये नास्ति –

(1) स्यादस्ति च नास्ति च
(2) स्याद् अवक्तव्यम्
(3) स्यान्नास्ति चास्ति चाव्यक्तम्
(4) स्यादस्ति च अवक्तव्यं च
(5) अनुत्तरितः प्रश्नः

94. जैनदर्शनाभिमतानि प्रमाणानि कति ?

(1) त्रीणि (2) द्वे
(3) चत्वारि (4) एकम्
(5) अनुत्तरितः प्रश्नः

95. जैनमते चैतन्यलक्षणः कः ?

(1) अजीवः (2) जीवः

(3) ईश्वरः (4) कर्म

(5) अनुत्तरितः प्रश्नः

96. जैनमते देहादेः आत्यन्तिको वियोगः अस्ति –

(1) बन्धः (2) जीवः

(3) अजीवः (4) मोक्षः

(5) अनुत्तरितः प्रश्नः

97. जैनदर्शनानुसारं सम्यग्ज्ञाने किं न परिगण्यते ?

(1) मतिः (2) दृष्टिः

(3) अवधिः (4) मनःपर्यायः

(5) अनुत्तरितः प्रश्नः

98. जैनदर्शने मिथ्यादर्शनम् अस्ति –

(1) षड्विधम् (2) द्विविधम्

(3) त्रिविधम् (4) चतुर्विधम्

(5) अनुत्तरितः प्रश्नः

99. जैनदर्शने जीवः अस्ति –

(1) बोधात्मकः

(2) जडात्मकः

(3) अचिद्रूपः

(4) चिदचिदुभयात्मकः

(5) अनुत्तरितः प्रश्नः

100. जैननये तत्त्वं नाम –

(1) अनन्तधर्मात्मकम्

(2) एकधर्मात्मकम्

(3) अन्यधर्मात्मकम्

(4) निर्धर्मात्मकम्

(5) अनुत्तरितः प्रश्नः

101. त्रिरत्नेषु नास्ति –

(1) सम्यग्दर्शनम् (2) सम्यग्ज्ञानम्

(3) सम्यग्जन्म (4) सम्यक्चारित्रम्

(5) अनुत्तरितः प्रश्नः

102. सौत्रान्तिकनये बाह्यं वस्तु अस्ति –

(1) सत् (2) असत्

(3) शून्यम् (4) विज्ञानम्

(5) अनुत्तरितः प्रश्नः

103. वैभाषिकसिद्धान्तानुसारम् इमानि न सन्ति –

(1) पञ्चस्कन्धाः (2) षोडशदुःखानि

(3) द्वादशायतनानि (4) अष्टादशधातवः

(5) अनुत्तरितः प्रश्नः

104. संसारनिर्वाणयोः द्वयोरपि असत्यत्वं के स्वीकुर्वन्ति –

(1) सौत्रान्तिकाः (2) योगाचाराः

(3) वैभाषिकाः (4) माध्यमिकाः

(5) अनुत्तरितः प्रश्नः

105. बौद्धमते 'प्रतीत्यसमुत्पादः' इत्यस्य अर्थः कः ?

(1) सापेक्षकार्यतावादः

(2) सापेक्षकारणतावादः

(3) भौतिकतावादः

(4) प्रत्यक्षतावादः

(5) अनुत्तरितः प्रश्नः

106. संक्षेपेण जैनदर्शने तत्त्वसंख्या अस्ति –

(1) त्रीणि (2) चत्वारि

(3) द्वे (4) नव

(5) अनुत्तरितः प्रश्नः

**107.** आलयविज्ञानं कैः स्वीकृतम् ?

(1) वैभाषिकैः (2) माध्यमिकैः

(3) योगाचारैः (4) सौत्रान्तिकैः

(5) अनुत्तरितः प्रश्नः

**108.** बौद्धदर्शने द्वादशनिदानान्तर्गतं नास्ति –

(1) जातिः (2) भवः

(3) जरामरणे (4) प्रपत्तिः

(5) अनुत्तरितः प्रश्नः

**109.** अधोलिखितेषु अष्टाङ्गिकमार्गेषु सम्मिलितं नास्ति –

(1) सम्यक् सङ्कल्पः

(2) सम्यक् संस्कारः

(3) सम्यक् कर्मान्तः

(4) सम्यक् स्मृतिः

(5) अनुत्तरितः प्रश्नः

**110.** आलयविज्ञानं भवति –

(1) नीलाद्युल्लेखि विज्ञानम्

(2) अहमास्पदं विज्ञानम्

(3) शून्यात्मकम्

(4) आत्मेति विज्ञानम्

(5) अनुत्तरितः प्रश्नः

**111.** चतुर्विध वैभाषिकेषु अयं नान्तर्भवति –

(1) भदन्तनागार्जुनः (2) भदन्तघोषः

(3) भदन्तबुद्धदेवः (4) भदन्तवसुमित्रः

(5) अनुत्तरितः प्रश्नः

**112.** बौद्धसम्प्रदाये बाह्यानुमेयवादी कः ?

(1) वैभाषिकः (2) योगाचारः

(3) माध्यमिकः (4) सौत्रान्तिकः

(5) अनुत्तरितः प्रश्नः

**113.** प्रमाणवार्तिकं रचना अस्ति –

(1) कुमारिलभट्टस्य (2) धर्मकीर्तेः

(3) शान्तरक्षितस्य (4) वसुमित्रस्य

(5) अनुत्तरितः प्रश्नः

**114.** माध्यमिकमते चतुष्कोटिविनिर्मुक्तं तत्त्वं किम् ?

(1) शून्यम् (2) विज्ञानम्

(3) ईश्वरः (4) अज्ञानम्

(5) अनुत्तरितः प्रश्नः

**115.** विज्ञानमात्रमिदं भुवनमिति कस्य सिद्धान्तः ?

(1) योगाचारस्य (2) माध्यमिकस्य

(3) वैभाषिकस्य (4) सौत्रान्तिकस्य

(5) अनुत्तरितः प्रश्नः

**116.** बौद्धदर्शने पञ्च स्कन्धेषु नास्ति –

(1) विज्ञानम् (2) वेदना

(3) संज्ञा (4) विद्या

(5) अनुत्तरितः प्रश्नः

**117.** बौद्धदार्शनिकस्य नागार्जुनस्य ग्रन्थः अस्ति –

(1) न्यायबिन्दुः

(2) माध्यमिककारिका

(3) प्रमाणसमुच्चयः

(4) तत्त्वसंग्रहः

(5) अनुत्तरितः प्रश्नः

118. विज्ञानवादः कस्य सिद्धान्तः ?

(1) माध्यमिकस्य (2) योगाचारस्य

(3) सौत्रान्तिकस्य (4) वैभाषिकस्य

(5) अनुत्तरितः प्रश्नः

119. सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः इति कस्य सिद्धान्तः ?

(1) चार्वाकदर्शनस्य (2) बौद्धदर्शनस्य

(3) जैनदर्शनस्य (4) वेदान्तदर्शनस्य

(5) अनुत्तरितः प्रश्नः

120. वैशेषिकनये विशेषनित्यद्रव्ययोः कः सम्बन्धः ?

(1) समवायसम्बन्धः (2) संयोगसम्बन्धः

(3) कालिकसम्बन्धः (4) स्वरूपसम्बन्धः

(5) अनुत्तरितः प्रश्नः

121. नव्यन्यायस्य प्रवर्तकः अस्ति –

(1) वाचस्पतिमिश्रः (2) गङ्गेशोपाध्यायः

(3) गदाधरभट्टाचार्यः (4) जयन्तभट्टः

(5) अनुत्तरितः प्रश्नः

122. यावज्जीवं सुखं जीवेत् इति कस्य दर्शनस्य सिद्धान्तः ?

(1) जैनदर्शनस्य (2) बौद्धदर्शनस्य

(3) चार्वाकदर्शनस्य (4) योगदर्शनस्य

(5) अनुत्तरितः प्रश्नः

123. शङ्कराचार्यमते कः वादः प्रसिद्धः ?

(1) आरम्भवादः

(2) सत्कार्यवादः

(3) प्रतीत्यसमुत्पादवादः

(4) विवर्तवादः

(5) अनुत्तरितः प्रश्नः

124. "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यः" इति वाक्यं कुत्र उपलभ्यते ?

(1) कठोपनिषदि

(2) छान्दोग्योपनिषदि

(3) बृहदारण्यकोपनिषदि

(4) तैत्तिरीयोपनिषदि

(5) अनुत्तरितः प्रश्नः

125. मध्वाचार्यस्य नामान्तरं किम् ?

(1) आनन्दतीर्थः (2) वेदान्तदेशिकः

(3) रामतीर्थः (4) नारायणतीर्थः

(5) अनुत्तरितः प्रश्नः

126. शून्यवादी कः ?

(1) दिङ्नागः (2) नागार्जुनः

(3) धर्मकीर्तिः (4) वसुबन्धुः

(5) अनुत्तरितः प्रश्नः

127. दृश्यते ज्ञायते अनेन इति दर्शनमित्यत्र दृश्धातूत्तरल्युट्प्रत्ययः कस्मिन्नर्थे प्रयुक्तः ?

(1) भावार्थे (2) कर्मण्यर्थे

(3) करणार्थे (4) अधिकरणार्थे

(5) अनुत्तरितः प्रश्नः

128. परिणामवादः कस्य सिद्धान्तः ?

(1) सांख्यदर्शनस्य

(2) न्यायदर्शनस्य

(3) वैशेषिकदर्शनस्य

(4) बौद्धदर्शनस्य

(5) अनुत्तरितः प्रश्नः

129. 'द्वादशलक्षणी' कस्य सूत्रग्रन्थस्य नामान्तरम् ?
(1) जैमिनिसूत्रग्रन्थस्य
(2) कणादसूत्रग्रन्थस्य
(3) ब्रह्मसूत्रग्रन्थस्य
(4) सांख्यसूत्रग्रन्थस्य
(5) अनुत्तरितः प्रश्नः

130. न्यायमते परार्थानुमितौ कति अवयवाः अपेक्ष्यन्ते ?
(1) त्रयः (2) चत्वारः
(3) पञ्च (4) सप्त
(5) अनुत्तरितः प्रश्नः

131. कस्मिन् वेदान्ते अनिर्वचनीयख्यातिवादः प्रसिद्धः ?
(1) विशिष्टाद्वैतवेदान्ते
(2) शुद्धाद्वैतवेदान्ते
(3) अद्वैतवेदान्ते
(4) द्वैताद्वैतवेदान्ते
(5) अनुत्तरितः प्रश्नः

132. मनसोऽणुत्वं कः स्वीकरोति ?
(1) सौगतः (2) जैनः
(3) नैयायिकः (4) अद्वैतवेदान्ती
(5) अनुत्तरितः प्रश्नः

133. साध्याभाववान् पक्ष इति कस्य हेत्वाभासस्य लक्षणम् ?
(1) असाधारणहेत्वाभासस्य
(2) विरुद्धहेत्वाभासस्य
(3) स्वरूपासिद्धिहेत्वाभासस्य
(4) बाधहेत्वाभासस्य
(5) अनुत्तरितः प्रश्नः

134. क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषः कः ?
(1) जीवः (2) मनः
(3) ईश्वरः (4) प्रकृतिः
(5) अनुत्तरितः प्रश्नः

135. विश्वनाथपञ्चाननमते अनुमितौ किं करणम् ?
(1) सन्निकर्षः
(2) व्याप्तिज्ञानम्
(3) परामर्शः
(4) अतिदेशवाक्यार्थस्मरणम्
(5) अनुत्तरितः प्रश्नः

136. न्यायमते समवायिकारणता कुत्र भवति ?
(1) गुणे (2) कर्मणि
(3) द्रव्ये (4) सामान्ये
(5) अनुत्तरितः प्रश्नः

137. न्यायसूचीनिबन्धानुसारेण गौतमीयन्यायसूत्रे कति सूत्राणि सन्ति ?
(1) 524 (2) 528
(3) 530 (4) 522
(5) अनुत्तरितः प्रश्नः

138. तत्त्वचिन्तामणिग्रन्थस्य कर्ता कः ?
(1) गदाधरभट्टाचार्यः
(2) गङ्गेशोपाध्यायः
(3) पक्षधरमिश्रः
(4) वर्धमानोपाध्यायः
(5) अनुत्तरितः प्रश्नः

139. संशयजनक – विरुद्धकोटिद्वयप्रतिपादकवाक्यं भवति –
(1) विप्रतिपत्तिः (2) संप्रतिपत्तिः
(3) अनुपपत्तिः (4) विसंवाद्यनुपपत्तिः
(5) अनुत्तरितः प्रश्नः

**140.** न्यायवैशेषिकनये "यत् समवायिकारणप्रत्यासन्नमवधृतसामर्थ्यम्" तत् कीदृशं कारणम् ?

(1) उपादानकारणम्

(2) निमित्तकारणम्

(3) समवायिकारणम्

(4) असमवायिकारणम्

(5) अनुत्तरितः प्रश्नः

**141.** पटरूपं प्रति पटः कीदृशं कारणम् ?

(1) समवायिकारणम्

(2) असमवायिकारणम्

(3) निमित्तकारणम्

(4) साधारणकारणम्

(5) अनुत्तरितः प्रश्नः

**142.** उदयनाचार्येण कस्मिन् ग्रन्थे ईश्वरसिद्ध्यर्थं युक्तयः प्रतिपादिताः ?

(1) लक्षणावल्याम्

(2) आत्मतत्त्वविवेके

(3) बौद्धधिक्कारे

(4) न्यायकुसुमाञ्जल्याम्

(5) अनुत्तरितः प्रश्नः

**143.** उपमितौ कः व्यापारः ?

(1) इन्द्रियार्थसन्निकर्षः

(2) परामर्शः

(3) पदार्थोपस्थितिः

(4) अतिदेशवाक्यार्थस्मरणम्

(5) अनुत्तरितः प्रश्नः

**144.** न्यायवार्त्तिककारः कः ?

(1) उदयनाचार्यः (2) वात्स्यायनः

(3) उद्योतकरः (4) वाचस्पतिमिश्रः

(5) अनुत्तरितः प्रश्नः

**145.** कार्यकारणसिद्धान्तविषये न्यायदर्शनस्य वादः अस्ति –

(1) सत्कार्यवादः (2) असत्कार्यवादः

(3) विवर्तवादः (4) असत्कारणवादः

(5) अनुत्तरितः प्रश्नः

**146.** न्यायदर्शनरीत्या अलौकिकः सन्निकर्षः कतिविधः ?

(1) द्विविधः (2) त्रिविधः

(3) चतुर्विधः (4) षड्विधः

(5) अनुत्तरितः प्रश्नः

**147.** स्मृतिभिन्नं यथार्थं ज्ञानम् उच्यते –

(1) संस्कारः (2) अनुभवः

(3) तर्कः (4) विपर्ययः

(5) अनुत्तरितः प्रश्नः

**148.** न्यायवैशेषिकनये भूतत्वं कुतो न जातिः ?

(1) साङ्कर्यात् (2) व्यक्तेरभेदात्

(3) तुल्यत्वात् (4) रूपहानेः

(5) अनुत्तरितः प्रश्नः

**149.** वैशेषिकसिद्धान्ते सृष्टिप्रलयसद्भावे किं मानम् ?

(1) प्रत्यक्षम् (2) अर्थापत्तिः

(3) श्रुतिः (4) उपमानम्

(5) अनुत्तरितः प्रश्नः

**150.** न्यायनये समवायसम्बन्धेन ज्ञानं कुत्र तिष्ठति ?

(1) आत्मनि (2) आकाशे

(3) काले (4) मनसि

(5) अनुत्तरितः प्रश्नः

रफ कार्य के लिए स्थान / SPACE FOR ROUGH WORK